

## चतुर्दशः पाठः

# यमुना विषरहिता जाता



एकदा षड्वर्षीयः श्रीकृष्णः वृन्दावने यमुनातटम् अगच्छत्। गोपाः अपि तेन सह अगच्छन्। गोपाः पिपासया आकुलाः अभवन्। ते यमुनाजलम् अपिबन्। जलं पीत्वा ते मूर्च्छिताः अभवन्। श्रीकृष्णः तान् मूर्च्छितान् दृष्ट्वा व्याकुलः अभवत्। वस्तुतः यमुनाजले कालियनागस्य कुण्डम् आसीत्। तेन यमुनाजलं विषज्वालाभिः विषाक्तं जातम्। अनेके खगाः पशवः च तत् जलं पीत्वा मृत्युं प्राप्ताः। वायुः अपि तेन विषयुक्तः अभवत्। तेन वायुना वृक्षाः शुष्काः जाताः।

यदा श्रीकृष्णः एतत् सर्वम् अपश्यत् सः एकं वृक्षम् आरोहत्। तस्मात् वृक्षात् सः विषयुक्ते जले अकूर्दत्। कालियनागस्य एकाधिकशतं फणाः आसन्। सः तान् प्रसार्य कृष्णं प्रहर्तुम् ऐच्छत्। श्रीकृष्णः तस्य फणान् आरुह्य अनृत्यत्। कालियनागस्य फणाः शनैः शनैः छिन्नाः भिन्नाः अभवन्। मुखात् रक्तं प्रावहत्।

सः हस्तौ संयोज्य अवदत्– "भगवन्! वयं नागाः जन्मतः एव विषयुक्ताः। अयं न मम अपराधः। भवान् एव सर्वप्राणिनां प्रभुः। अनुग्रहं करोतु निग्रहं वा" इति। एवं प्रार्थितः श्रीकृष्णः अनुग्रहं कुर्वन् अवदत् "रे दुष्ट! किं न जानासि त्वं यत् तव कारणात् सर्वं जलं विषयुक्तं भवति। इतः कुत्रापि अन्यत्र गच्छ" इति। सर्पः ततः पलायितः। एवं च यमुना विषरहिता जाता।

## शब्दार्थाः



| | | |
|---|---|---|
| **षड्वर्षीयः** | – | छः वर्ष की आयु वाला |
| **तटम्** | – | किनारा |
| **गोपाः** | – | ग्वाले/ग्वालबाल |
| **पिपासया** | – | प्यास से |
| **कुण्डम्** | – | कुण्ड |
| **विषज्वालाभिः** | – | विष की ज्वाला से |
| **विषाक्तम्** | – | जहर से मिला हुआ |
| **शुष्काः जाताः** | – | सूख गए |
| **यदा** (अव्यय) | – | जब |
| **आरोहत्** | – | चढ़ गया/गई |
| **न्यपतत्** | – | कूद गया/गई/नीचे गिर गया/गई |
| **एकाधिकशतम्** | – | एक सौ एक |
| **प्रसार्य** | – | फैलाकर |
| **प्रहर्तुम्** | – | प्रहार करने के लिए |
| **ऐच्छत्** | – | इच्छा की |
| **आरुह्य** | – | चढ़कर |
| **अनृत्यत्** | – | नाचने लगा/नाचा/नाचने लगी/नाची |

| | | |
|---|---|---|
| **शनैः शनैः** (अव्यय) | – | धीरे धीरे |
| **छिन्नाः भिन्नाः** | – | टुकड़े टुकड़े |
| **रक्तम्** | – | खून |
| **प्रावहत्** | – | बहने लगा/लगी |
| **जन्मतः** | – | जन्म से |
| **अनुग्रहः** | – | कृपा |
| **निग्रहः** | – | दण्ड/बन्धन |
| **कुर्वन्** | – | करता हुआ |
| **प्रार्थितः** | – | प्रार्थना करने पर |
| **इतः** (अव्यय) | – | यहाँ से |
| **ततः** (अव्यय) | – | वहाँ से |
| **पलायितः** | – | भाग गया |



## अभ्यासः

1. उदाहरणम् अनुसृत्य रिक्तस्थानानि पूरयत–

| | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| **यथा–** | प्रथमपुरुषः | अगच्छत् | अगच्छताम् | अगच्छन् |
| | मध्यमपुरुषः | ................. | अपठतम् | ................. |
| | उत्तमपुरुषः | ................. | ................. | अखादाम |
| | प्रथमपुरुषः | ................. | अहसताम् | ................. |
| | मध्यमपुरुषः | ................. | ................. | अरक्षत |
| | उत्तमपुरुषः | अनमम् | ................. | ................. |

## 2. प्रश्नानाम् उत्तराणि लिखत–

(क) गोपाः केन सह अगच्छन्?

(ख) एकदा श्रीकृष्णः कुत्र अगच्छत्?

(ग) श्रीकृष्णः किमर्थं व्याकुलः अभवत्?

(घ) खगाः पशवः च कथं मृत्युं प्राप्ताः?

(ङ) कालियनागस्य कति फणाः आसन्?

(च) सर्वप्राणिनां प्रभुः कः?

## 3. रिक्तस्थानानि पूरयत–

(क) गोपाः ................ आकुलाः अभवन्।

(ख) श्रीकृष्णः तान् मूर्च्छितान् दृष्ट्वा ................ अभवत्।

(ग) यमुनाजले ................ कुण्डम् आसीत्।

(घ) यमुना ................ जाता।

(ङ) इतः कुत्रापि ................ गच्छ।

## 4. यथायोग्यं योजयत–

| **क** | **ख** |
|---|---|
| कुण्डम् | प्रावहत् |
| वृक्षम् | ऐच्छत् |
| प्रहर्तुम् | अभवन् |
| रक्तम् | आरोहत् |
| आकुलाः | आसीत् |

## 5. विलोमपदं लिखत-

(क) जन्म ........................

(ख) अमृतम् ........................

(ग) आदरः ........................

(घ) अनेकम् ........................

## 6. मञ्जूषातः पदानि चित्वा अनुच्छेदं पूरयत-

| | | | | |
|---|---|---|---|---|
| अयच्छत् | अभवत् | अमिलत् | आसीत् | अनयन् |
| अपठताम् | द्वारिकायाः | अगच्छत् | अकरोत् | तण्डुलान् |

सुदामा श्रीकृष्णस्य मित्रम् ..........................। सः सर्वप्रथमं गुरुकुले श्रीकृष्णेन सह ..........................। एतौ मिलित्वा गुरोः समीपम् एकादश पाठान् ....................।



कालक्रमेण वासुदेवः .......................... नृपः ..........................। सुदामा तु दरिद्रः एव आसीत्। सः श्रीकृष्णदर्शनाय द्वारिकाम् ..........................। द्वाररक्षकाः तं राजसभाम् ..........................। बाल्यबन्धुः वासुदेवः तस्य आलिङ्गनम् ..........................। श्रीकृष्णः सुदाम्नः भार्यया प्रदत्तान् .......................... अखादत्। दारिद्र्यस्य निवारणाय श्रीकृष्णः तस्मै ऐश्वर्यम् ..........................।